श्री प्रत्यंगिरा सहस्राक्षरी मंत्रः

श्री प्रत्यंगिरा सहस्राक्षरी मंत्रः

अस्य श्रीप्रत्यंगिरा सहस्राक्षरी मंत्रस्य भैरव ऋषिः, अनुष्टुप् छंदः, श्रीप्रत्यंगिरा देवताः, क्रीं बीजं, ह्रीं शक्तिः, हूं कीलकं, श्रीप्रत्यंगिरा देवता प्रीत्यर्थे जपे विनियोगः ||

ऋष्यादिन्यासः –
भैरवऋषये नमः शिरसि |
अनुष्टुप् छंदसे नमः मुखे |
श्रीप्रत्यंगिरा देवतायै नमः हृदि |
क्रीं बीजाय नमः गुह्ये |
ह्रीं शक्तये नमः पादयोः |
हूं कीलकाय नमः नाभौ |
विनियोगायः नमः सर्वांगे ||

करन्यासः –
ॐ क्रां अंगुष्ठाभ्यां नमः |
ॐ क्रीं तर्जनीभ्यां नमः |
ॐ क्रूं मध्यमाभ्यां नमः |
ॐ क्रैं अनामिकाभ्यां नमः |
ॐ क्रौं कनिष्ठिकाभ्यां नमः |
ॐ क्रः करतल करपृष्ठाभ्यां नमः |

हृदयादिन्यासः –
ॐ क्रां हृदयाय नमः |
ॐ क्रीं शिरसे स्वाहा |
ॐ क्रूं शिखायै वषट् |
ॐ क्रैं कवचाय हुं |
ॐ क्रौं नेत्रत्रयाय वौषट् |
ॐ क्रः अस्त्राय फट् |

ध्यानं –

सिंहारूढां कृष्णवर्णां भीषणां नीलविग्रहां
ज्वालामुखीं शूलकरां ग्रसंतीं रिपुमंजसां |
व्याघ्रचर्मांबरधरां सितशार्दूलवाहिनीं
विकराळमुखीं तिग्मदंष्ट्रां कृच्छ्रादिभूषणां || 1 ||

दधतीं छुरिकावज्रशूलतोमरकांकरैः
भस्मोद्धूळितसर्वांगीं नीलकुंचितकुंतलां |
भयंकरीं तु दुष्टानां भक्तानामभयंकरीं
चिंतनीयां सदा देवैः चेतसा परमेश्वरीं || 2 ||

अथ सहस्राक्षरी मंत्रः –

ॐ नमश्चामुंडायै अभय-वर-कपालमाला-धरे गृद्ध्रोलूककंकपरिवारे श्मशानप्रिये नररुधिरमांसप्रियभोजने सिद्धविद्याधर वंदितचरणे ब्रह्म-सूर्य-शशि-यम-वरुण-कुबेर-विष्णु-पूजिते रुद्रकोटिनिर्गतशरीरे द्वादशादित्यप्रभे एहि चामुंडास्वरूपिणि, अस्मिन् मंडले प्रविश शीघ्रं दक्षिणां दिशं असिभिः पूरय पूरय धुनु-धुनु विधुन-विधुन कटु-कटु चूर्णय-चूर्णय आवेशय-आवेशय प्रवेशय-प्रवेशय स्फोटय-स्फोटय त्रोटय-त्रोटय धियं रोधय-रोधय पाताळं स्तंभय-स्तंभय परमुद्रां स्फोटय-स्फोटय अन्यभूतानि जंभय [जंभय] ब्रह्मराक्षसान् उत्सादय-उत्सादय भूतप्रेतपिशाचान् मोचय-मोचय वृक्षान् संक्रामय-संक्रामय नदीं चालय-चालय अग्निं स्तंभय-स्तंभय नदां कीलय-कीलय अंगारान् वृक्षस्योपरि पातय-पातय सीलिवमभितोलूखले पीडय-पीडय नदीं परिवर्तय-परिवर्तय पात्रं पूरय-पूरय भूतं भव्यं भविष्यं यत् किंचित् कथय-कथय हन-हन दह-दह पच-पच मथ-मथ प्रमथ-प्रमथ कट-कट ग्रस-ग्रस विद्रावय-विद्रावय उत्सादय-उत्सादय विष्णुचक्रेण रुद्रत्रिशूलेन इंद्रवज्रेण वरुणपाशेन यमदंडेन गरुडपक्षपातेन विषं निर्विषं कुरु-कुरु ज्वरं नाशय-नाशय विरोधीन् स्फोटय-स्फोटय यंत्रं भंजय-भंजय सत्यं साधय-साधय सिद्धिं प्रयच्छ सर्वसत्त्वानि वशं कुरु-कुरु पातय-पातय पश्चिमदिशं स्तंभय-स्तंभय दक्षिणदिशं रोधय-रोधय ज्वालिनि जृंभिणि स्तंभिनि भृकुटी विचित्रहारमंडलविभूषित नाना नाग वासुकी कृत हार भूषण शरीरे नमो लेलिहानि विकृतमेखले मरुद्दृच्छरीरे चंद्रार्काभा प्रभंजनीये विद्युत् स्फटिकसंकाश अट्टहासिनी वेताळप्रिये क्रींकार हुंकार जृंभणीये मुसलपट्टिशतोमरछुरिकाविग्रहे सहस्रबाहुधारिणी ओंकारहृदये विष्णुभावशरीरे सर्वदुष्टान् विनाशय-विनाशय विदारय-विदारय योजनशतं रक्ष-रक्ष नगरान् निर्विषं कुरु-कुरु पवनान् नाशय-नाशय भयान् मोचय-मोचय वृक्षाश्चूर्णय-चूर्णय शस्त्रमस्त्रं नष्टं कुरु-कुरु सेनां त्रोटय-त्रोटय गोभक्षकाणां तुंडं बंधं कुरु-कुरु ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः एकविंशति जपादग्निं विदारय ऊर्ध्वप्रलंबकेशे नीलांबरे सितशार्दूलप्रिये महा आवर्तबले भैरवरूपेण हर-हर प्रयच्छ-प्रयच्छ रुद्ररूपेण यत्कालदृष्टं तत्सर्वं उल्कापय उल्कापय कालकूटविषं निर्विषं कुरु-कुरु ज्वरं नाशय-नाशय एकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं दृष्टिज्वरं सन्निपातं सततज्वरं तत्क्षणिकं षाण्मासिकं सांवत्सरिकं वा गुग्गुलधूपेन अष्टाभिमंत्रितं तेन ज्वरं नाशय-नाशय गौरसर्षप अभिमंत्रितेन कुमारिकं पिंडं बध्नामि अंतरिक्षगतं बध्नामि, श्रोत्रं बध्नामि, पातालं बध्नामि आकर्षय ब्रह्मक्षत्रियवैश्यशूद्रांग नानाचांडालाष्टप्रकृतिनां भस्मोद्धूळितशरीरे नमः ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ऐं ह्रीं क्लीं नमः ||

फलश्रुतिः –
मृतवत्सा तु या नारी सा च गर्भे न मुंचति |
बालो रोदिति यस्यास्ति स्तनपानं पिबेन्न चेत् || 1 ||

सर्वासु ग्रहबाधासु गुग्गुलं सप्तमंत्रितं |
विधाय धूपयेत्तेन सर्वबाधा प्रशाम्यति || 2 ||

युद्धादौ मंत्रयेच्छत्रं तेनासौ विजयी भवेत् |
अरिष्टशांतये तोयमष्टवाराभिमंत्रितं || 3 ||

प्राशयेदभिषिंचेद्वा यथा सूर्योदये तमः |
डाकिनी भूतग्रहादौ जाप्येति सहस्राक्षरी || 4 ||